## एकाचो बशो भष् झषन्तस्य स्ध्वोः। (३७/३२६)

धातोरवयवो य एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् आदेशो भवति झलि सकारे ध्वशब्दे च परतः पदान्ते च। अत्र चत्वारो बशः स्थानिनो भषादेशाश्चत्वार एव, तत्र सङ्ख्यातानुदेशे प्राप्ते डकारस्य स्थानिनोऽभावात् ढकारादेशो न भवति? आन्तर्यतो व्यवस्था विज्ञास्यते। बुध – भोत्स्यन्ते। अभुद्ध्वम्। अर्थभुत्। गुह – निघोक्ष्यते। न्यघूढ्वम्। [1]पर्णघुट्। दुह – धोक्ष्यते। अधुग्ध्वम्। [2]गोधुक्। अजर्घाः – गृधेः यङ्लुगन्तस्य लङि सिपि लघूपधगुणे कृते[3] सिपो हल्ङ्यादिलोपे च धातोः अवयवस्य एकाचो बशः स्थाने भष्भावः, ततो धकारस्य जश्त्वम्, 'दश्च' (८.२.७५/२४६८) इति रुत्वम्, 'रो रि' (८.३.१४/१७३) इति [4]पूर्वरेफस्य लोपः, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६.३.१११/१७४) इति दीर्घत्वम्। गदर्भयतेः [5]अप्रत्ययः – गर्धप्। एकाचः इति किम्? दामलिहमिच्छति दामलिह्यति, दामलिह्यतेरप्रत्ययः, दामलिट्। असति ह्येकाज्ग्रहणे धातोः इत्येतद् बशो [6]विशेषणं स्यात्। बशः इति किम्? क्रुध – क्रोत्स्यति। झषन्तस्य इति किम्? दास्यति। स्ध्वोः इति किम्? बोद्धा। बोद्धुम्। बोद्धव्यम्। धकारस्य [7]बकारोपसृष्टस्य ग्रहणं किम्? [8]दादद्धि। 'दध धारणे' (धा पा. ८) इत्येतस्य यङ्लुकि लोटि 'हुझल्भ्यो हेर्धिः' (६.४.१०१/२४२५) इति धिभावे[9] सत्येतद्भवति॥

## दधस्तथोश्च। (३८/२५०१)

दधः इति दधातिः कृतद्विर्वचनो निर्दिश्यते। तस्य झलन्तस्य बशः स्थाने भष् आदेशो भवति तकारथकारयोः परतः, चकारात् स्ध्वोश्च परतः। धत्तः। धत्थः। धत्से। धत्स्व। धद्ध्वम्। वचनसामर्थ्यादातो लोपस्य स्थानिवद्भावो न भवति। अभ्यासजश्त्वस्य चासिद्धत्वम्। तथोः इति किम्? आनन्तर्यात् स्ध्वोरेव विज्ञायेत। चकारः तयोरनुवृत्त्यर्थः। झषन्तस्य इत्येव, दधाति॥

## झलां जशोऽन्ते। (३९/८४)

झलां जशः आदेशा भवन्ति पदस्यान्ते वर्तमानानाम्। वागत्र। [10]श्वलिडत्र। अग्निचिदत्र। त्रिष्टुबत्र। अन्तग्रहणं[11] झलि इत्येतस्य निवृत्त्यर्थम्। वस्ता। [12]वस्तव्यम्॥

## झषस्तथोर्धोऽधः। (४०/२२८०)

झष उत्तरयोः तकारथकारयोः स्थाने धकारः आदेशो भवति, [13]दधातिं वर्जयित्वा। लब्धा। लब्धुम्। लब्धव्यम्। अलब्ध। अलब्धाः। दुह – दोग्धा। दोग्धुम्। दोग्धव्यम्। अदुग्ध। अदुग्धाः। लिह – लेढा। लेढुम्। लेढव्यम्। अलीढ। अलीढाः। बुध – बोद्धा। बोद्धुम्। बोद्धव्यम्। अबुद्ध। अबुद्धाः। अधः इति किम्? धत्तः। धत्थः॥

---

1. वर्णधुट् इ. 2. धुक् इ. 3. सति इत्यधिकम् क. 4. पूर्वस्य रेफस्य क. 5. गर्दभयतेः क्विप् प्रत्ययः ड, गर्दभमाचष्टे इति णिच् इत्यधिकम् इ. क. 6. विशेषणार्थं इ. क. ह. ब. 7. च प्रश्लिष्टस्य ब, बकारस्य श्लिष्टस्य क, बकारे प्रश्लिष्टस्य ह. 8. ददद्धि ह. 9. कृते इत्यधिकम् ब. क. 10. लिडत्र क. 11. किम् इत्यधिकम् क. इ. 12. वस्तुम् क. इ. ड, वस्तव्यम् नास्ति ह. 13. अधः ह.